पंचायुध स्तोत्रं

पंचायुध स्तोत्रं

स्फुरत्सहस्रारशिखातितीव्रं
सुदर्शनं भास्करकोटितुल्यं |
सुरद्विषां प्राणविनाशि विष्णोः
चक्रं सदाऽहं शरणं प्रपद्ये || 1 ||

विष्णोर्मुखोत्थानिलपूरितस्य
यस्य ध्वनिर्दानवदर्पहंता |
तं पांचजन्यं शशिकोटिशुभ्रं
शंखं सदाऽहं शरणं प्रपद्ये || 2 ||

हिरण्मयीं मेरुसमानसारां
कौमोदकीं दैत्यकुलैकहंत्रीं |
वैकुंठवामाग्रकराभिमृष्टां
गदां सदाऽहं शरणं प्रपद्ये || 3 ||

रक्षोऽसुराणां कठिनोग्रकंठ-
-च्छेदक्षरच्छोणितदिग्धधारं |
तं नंदकं नाम हरेः प्रदीप्तं
खड्गं सदाऽहं शरणं प्रपद्ये || 4 ||

यज्ज्यानिनादश्रवणात् सुराणां
चेतांसि निर्मुक्तभयानि सद्यः |
भवंति दैत्याशनिबाणवर्षि
शार्ङ्गं सदाऽहं शरणं प्रपद्ये || 5 ||

इमं हरेः पंचमहायुधानां
स्तवं पठेद्योऽनुदिनं प्रभाते |
समस्तदुःखानि भयानि सद्यः
पापानि नश्यंति सुखानि संति || 6 ||

वने रणे शत्रु जलाग्निमध्ये
यदृच्छयापत्सु महाभयेषु |
इदं पठन् स्तोत्रमनाकुलात्मा
सुखी भवेत् तत्कृत सर्वरक्षः || 7 ||

अधिक श्लोकाः –
यच्चक्रशंखं गदखड्गशार्ङ्गिणं
पीतांबरं कौस्तुभवत्सलांछितं |
श्रियासमेतोज्ज्वलशोभितांगं
विष्णुं सदाऽहं शरणं प्रपद्ये ||

जले रक्षतु वाराहः स्थले रक्षतु वामनः |
अटव्यां नारसिंहश्च सर्वतः पातु केशवः ||

इति पंचायुध स्तोत्रं ||